दिनांक 7-9-20 उपशास्त्री द्वितीय वर्ष, विषय व्याकरण
ग्रन्थ- सिद्धान्त कौमुदी, अदादि प्रकरणम्

1 ईयतुः - इण् धातोर्लिट्, लटस्थाने तिप्तस्झि इति सूत्रेण तस् प्रत्यये। परस्मैपदानां णलतु इति सूत्रेण तस् स्थाने अतुस् आदेशे। लिटि धातोरनभ्यासस्य इति द्वित्वे अभ्यासादि कार्ये इ इ अतुस् इति दशायां असंयोगाल्लिट् कित् इति सूत्रेण कित्वे कित्वात् अभ्यासस्यासवर्णे इति इयङ् आदेशे, दीर्घः इणः किति इति सूत्रेण अभ्यासस्य दीर्घे ईयतुस् इति जाते। सत्व रुत्वे विसर्गे ईयतुः इति सिद्धम्।

2 अगात - इण् धातोर्लुङि लुङ् स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यय अनुबन्ध लोपे। इतश्च इति इकार लोपे। लुङ् लङ् लृङ्क्ष्वडुदात्तः इति सूत्रेण अडागमे। अ इ त् इति जाते। इणो गा लुङि इति सूत्रेण इण् स्थाने गा आदेशे। च्लि लुङि इति सूत्रेण च्लि प्रत्यये। च्लेः सिच् इति सिच् आदेशे गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु इति सिचो लुक्। अगात् इति सिद्धम्।

3 शेते - शीङ् धातोर्लट्, ङित्वात् तङ्, तिप्तस्झि इति सूत्रेण त प्रत्यये। तिङ् शित् सार्वधातुकम् इति सूत्रेण सार्वधातुक संज्ञायाम्, कर्तरि शप् इति शप् प्रत्यये, अदिप्रभृतिभ्यः शपः इति शपो लुक्। शीङः सार्वधातुके गुणः इति सूत्रेण गुणे। टित आत्मनेपदानां टेरे इति एत्वे शेते इति सिद्धम्।

4 शयाते - शीङ् धातोर्लट्, लट् स्थाने तिप्तस्झि इति सूत्रेण आताम् प्रत्यये। सार्वधातुक संज्ञायाम् शप् प्रत्यये, अदिप्रभृतिभ्यः शपः इति शपो लुक्, शीङः सार्वधातुके गुणः इति ईकारस्य गुणे एचोऽयवायावः इति अयादेशे टित आत्मनेपदानां टेरे इति एत्वे शयाते इति सिद्धम्।

अमरनाथ मिश्र
एसो॰ प्रो॰ व्याकरण
रा॰ उ॰ सं॰ म॰ वि॰
सुलतानपुर

दिनांक 9-9-20

उपशास्त्री प्रथम वर्ष, विषय - व्याकरण
सिद्धान्त कौमुदी, अजन्त स्त्रीलिङ्ग प्रकरणम्

1 सर्वस्यै - सर्वा शब्दात् अर्थवदिति प्रातिपदिक संज्ञायां, स्वौजस इति सूत्रेण द्वयेकयोर्द्विवचनैकवचने इति सूत्र सहकारेण सर्वा शब्दात् ङे विभक्तौ अनुबन्ध लोपे, याडापः इति सूत्रेण याडागमे प्राप्ते तं प्रबाध्य सर्वनाम्नः स्याड्ढ्रस्वश्च इति सूत्रेण स्याडागमे आपश्च ह्रस्वे सर्व स्या ए इति जाते वृद्धिरेचि इति वृद्धौ सर्वस्यै इति सिद्धम्।

2 सर्वासाम् - सर्वा शब्दात् अर्थवदिति प्रातिपदिक संज्ञायाम्, स्वौजस इति सूत्रेण तथा बहुषु बहुवचनम् इति सूत्र सहकारेण सर्वा शब्दात् आम् विभक्तौ आमि सर्वनाम्नः सुट् इति सूत्रेण सुडागमे अनुबन्ध लोपे। सर्वासाम् इति सिद्धम्।

3 मत्यै - मति शब्दात् चतुर्थी एकवचने ङे विभक्तौ ङिति ह्रस्वश्च इति सूत्रेण वा नदीसंज्ञायाम् आण्नद्याः इति आडागमे आटश्च इति वृद्धौ इको यणचि इति यणि मत्यै इति सिद्धम्

4 मतये - मति - ए इति दशायां शेषो घ्यसखि इति सूत्रेण घिसंज्ञायाम्, घित्वात् घेर्ङिति इति सूत्रेण गुणे, एचोऽयवायावः इति सूत्रेण अयादेशे सति मतये इति सिद्धम्।

5 मत्याः मति शब्दात् पञ्चमी एकवचने तथा षष्ठी एकवचने ङसि, ङस विभक्तौ अनुबन्ध लोपे मति अस् इति दशायां ङिति ह्रस्वश्च इति सूत्रेण वा नदीसंज्ञायाम् आण्नद्याः इति सूत्रेण आडागमे, आटश्च इति सूत्रेण वृद्धौ इको यणचि इति सूत्रेण यणादेशे सकारस्य रुत्वे विसर्गे मत्याः इति सिद्धम्।

अमरनाथ मिश्र
स० प्रो० व्याकरण
रा०उ०सं०म०वि० जुवोता
प्राणीपा

दि० ९-९-२० शास्त्री प्रथमखण्ड, विषय- व्याकरण अनि० प्र०पत्र

ग्रन्थ- लघुसिद्धान्तकौमुदी, समासप्रकरणम्

1 व्यूढोरस्कः – व्यूढम् उरो यस्य इति विग्रहे अनेकम् अन्यपदार्थे इति सूत्रेण समासे, समासत्वात् प्रातिपदिकसंज्ञायाम्, सुब्लुकि। उरःप्रभृतिभ्यः कप् इति सूत्रेण कप् प्रत्यये अनुबन्धलोपे। खरवसानयोर्विसर्जनीयः इति विसर्गे। कस्कादिषु च इति सूत्रेण सत्वे सत्परत्वे विसर्गे।

2 महायशस्कः, महायशाः – महत् यशो यस्य इति विग्रहे अनेकम् अन्यपदार्थे इति सूत्रेण समासे। शेषाद्विभाषा इति सूत्रेण समासान्त कप् प्रत्यये अनुबन्धलोपे। आन्महतः समानाधिकरणजातीययोः इति सूत्रेण महत् स्थाने आत्वे। कपपक्षे महायशस्कः कपाभावे महायशाः रूपम् भवति।

3 राजदन्तः – दन्तानां राजा इति विग्रहे षष्ठी इति सूत्रेण समासे, समासत्वात् प्रातिपदिकत्वे सुब्लुकि। प्रथमान्तत्वात् उपसर्जन संज्ञायां, उपसर्जनं पूर्वम् इति पूर्वनिपाते प्राप्ते तं प्रबाध्य राजदन्तादिषु परम् इति सूत्रेण तन्निषेधे कृते, विभक्तिकार्ये राजदन्तः इति सिद्धम्।

4 अर्थधर्मौ, धर्मार्थौ – अर्थश्च, धर्मश्च, अथवा धर्मश्च अर्थश्च इति विग्रहे चार्थे द्वन्द्वः इति सूत्रेण समासे समासत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि, धर्मादिष्वनियमः इति वार्तिकेन अर्थधर्मौ, धर्मार्थौ इति रूपम् भवति।

अमरनाथमिश्र
सहा० प्रो० व्याकरण
रा०उ०सं०म०वि०
सुलसीना पूर्णिया